# तीर्थाष्टकम्

Tirthashtakam

sanskritdocuments.org

February 19, 2019

# Tirthashtakam

# तीर्थाष्टकम्

## Sanskrit Document Information

Text title : tIrthAShTakam

File name : tIrthAShTakam.itx

Category : misc, aShTaka

Location : doc_z_misc_general

Author : Kavi Dvijendra

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Brihat Stotra Ratnakar Shivadutta Shastri

Latest update : February 19, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

February 19, 2019

*sanskritdocuments.org*

# तीर्थाष्टकम्

मातृतीर्थम्- नास्ति मातृसमं तीर्थं पुत्राणां तारणाय च ।
हितायाऽत्र परत्रार्थं यैस्तु माता प्रपूजिता ॥ १॥

पितृतीर्थम्- वेदैरपि च किं पुत्र ! पिता येन प्रपूजितः ।
एष पुत्रस्य वै धर्मस्तथा तीर्थं नरेष्विह ॥ २॥

गुरुतीर्थम्- अज्ञान-तिमिरान्धत्वं गुरुः शीघ्रं प्रणाशयेत् ।
तस्मात् गुरुः परं तीर्थं शिष्याणां हितचिन्तकः ॥ ३॥

भक्ततीर्थम्- तीर्थभूतो हरेर्भक्तः स्वयं पूतश्च पावकः ।
येन भस्मीकृतो लोके पापपुञ्जो हि सुव्रत! ॥ ४॥

पतितीर्थम्- प्रयाग-पुष्करसमौ पत्युः पादौ स्मृतावतः ।
स्नातव्यं सततं स्त्रीभिस्तीर्थभूते सरोवरे ॥ ५॥

पत्नीतीर्थम्- नास्ति पत्नीसमं तीर्थं भूतले तारणाय तु ।
यस्य गेहे सती नारी स धन्यः पुरुषो मतः ॥ ६॥

मित्रतीर्थम्- सम्पत्तौ च विपत्तौ च यस्तिष्ठति सदाऽत्र वै ।
मित्रतीर्थं परं लोके मुनिभिः परिभाषितम् ॥ ७॥

विप्रतीर्थम्- जङ्गमं विप्रतीर्थं तद् वेदपूतं च निर्मलम् ।
यस्य वाक्-सलिलेनैव शुद्ध्यन्ति मलिनो जनाः ॥ ८॥

तीर्थाष्टकमिदं पुण्यं श्री"द्विजेन्द्र"विनिर्मितम् ।
सेवितव्यं सदा भक्त्या भुक्ति-मुक्तिप्रदायकम् ॥ ९॥

इति श्रीगार्ग्यमुनि"द्विजेन्द्र"कविकृतं तीर्थाष्टकं समाप्तम् ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Tirthashtakam*

pdf was typeset on February 19, 2019

Please send corrections to *sanskrit@cheerful.com*